# Model Question Paper
## SANSKRIT – II YR

TIME: 3 HRS MARKS: 100

www.sakshieducation.com

I. **एकस्य** श्लोकस्य प्रतिपदार्थं तात्पर्यं च लिखत। 8M

न गीतवाद्याभिरतिर्विलासव्यसनी भवेत्।
दैत्यानां श्रीवियोगोऽभूत् सत्यधर्मच्युतात्मनाम्॥

**अथवा**

धीरो भव सदा चित्ते निर्भयोऽस्मीति भावय।
भयं मृत्युर्भयं पापं नरको भयमेव च॥

II. गङ्गावतरणे रतस्य भगीरथस्य प्रयत्नं संग्रहेण लिखत। 6M

**अथवा**

पुष्पावचयार्थं वनमागतं भक्तं प्रति पुष्पाणि किमवदन् ?

III. बाणभट्टः अनाथपरिपालनकथां कथं वर्णितवान् ? 6M

**अथवा**

दधीचिः दानवीरः कथं अभवत्?

IV. **त्रयाणां** प्रश्नानां समाधानानि लिखत। 6M

1. आश्रमपदे रामसीतालक्ष्मणाः कथं स्थिताः ?
2. आत्मनः वनगमनविषये रामः भरतं किं अवदत्?
3. पितृसद्मगोचरः अपि शिवः कीदृशः?
4. वासुकिना गरुत्मान् किमिति अभिहितः?
5. पार्वती कथं तपः आचरति ?
6. गरुडेन कः त्वं इति पृष्टः जीमूतवाहनः किमवदत् ?

V. **द्वयोः** ससन्दर्भं व्याख्यानं लिखत। 6M

1. सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः।
2. किमिवान्यत् कलिरेक एव धन्यः।
3. नृणां हि नीतिः क्व नु।
4. अवदत् माङ्गलिकं गलेऽस्ति ते।

VI. **द्वयोः** ससन्दर्भं व्याख्यानं लिखत। 6M

1. अनाथपरिपालनं अस्मद्विधानां धर्मः।
2. भो भो मा भैष्ट भद्राः।
3. मन्ये इदं मम परमं सौभाग्यम्।
4. मन एव मनुष्याणां कारणं बन्धमोक्षयोः।

VII. **त्रयाणां** प्रश्नानां समाधानानि लिखत। 6M

1. कस्याः पतनं पृथिवी न सहिष्यति ?
2. पाण्ड्यराजः खड्गं कथं प्राप्तवान् ?
3. कैः प्रीतिसङ्गतिं न कुर्यात् ?
4. कानि यत्नतः गोप्यानि ?
5. विश्वामित्रः हरिश्चन्द्राय किं ददे इति अवदत् ?
6. अयं पुष्पविलापः इति पाठः कस्य कवेः ग्रन्थस्य अनुवादः ?

VIII. **त्रयाणां** प्रश्नानां समाधानानि लिखत। 6M

1. बाणभट्टेन विरचितं काव्यद्वयं किम् ?
2. एकस्मिन् दिने कृष्णः कान् ददर्श ?
3. नरेन्द्रः श्रीरामकृष्णं किमिति अपृच्छत् ?
4. विष्णोः वचनं श्रुत्वा इन्द्रः किं अवदत् ?
5. कदा चूडाला जटाश्मश्रुवेषं विमुच्य राज्ञः सम्मुखं अतिष्ठत् ?
6. वीरः कः ? सः किमर्थं भूमण्डले निवसति ?

www.sakshieducation.com

IX. **एकेन वाक्येन समाधानं दत्त।** 5M

1. का जह्नुसुता इति प्रोच्यते ?
2. मधुराराजः कीदृशः ?
3. सत्यविजयः इत्ययं पाठः केन विरचितः ?
4. किं मृत्युः उच्यते ?
5. कस्य पूजा विफला भवति ?

www.sakshieducation.com

X. **एकेन वाक्येन समाधानं दत्त।** 5M

1. शुकस्य नाम किम् ?
2. कृष्णाय गोविन्दः इति बिरुदं केन दत्तम् ?
3. वीरः राज्ञः कण्ठे कीदृशीं दिव्यमालां समर्पितवान् ?
4. उज्जयिन्याः राजा कः ?
5. पूर्णाहुतिकाले यज्ञकुण्डात् कः असुरः निर्गतः ?

XI. 5M

अस्ति कस्मिंश्चित् वने चतुरको नाम जम्बुकः। तेन कदाचिदरण्ये स्वयं मृतः गजः समासादितः। अथ तुष्टः स तस्य समन्तात् भ्रमति स्म। परं कठिनां तस्य त्वचं दन्तैः भेत्तुं न शशाक। अत्रान्तरे कोऽपि सिंहः तत्र आजगाम। तं दृष्ट्वा वञ्चकः चतुरकः साष्टाङ्गपातं प्रणिपत्य प्रोवाच – स्वामिन्! भवत्पादसेवकोऽहं भवदर्थे गजमिमं रक्षामि। तदयं भक्ष्यतां स्वामिना इति। सिंहः प्राह – जम्बुक! नाहमन्यहतं सत्वं भक्षयामि। तदेव ते मया प्रसादीकृतम्। अतः त्वमेव भक्षय इति। तत् श्रुत्वा जम्बुकः सानन्दमाह – युक्तमेव स्वामिनो मृगेन्द्रस्य इति। अथ सिंहः गतः।

**प्रश्नाः**

1. जम्बुकस्य नाम किम् ?
2. जम्बुकेन अरण्ये कः समासादितः ?
3. तस्य त्वक् कथमस्ति ?
4. तत्र कः आजगाम ?
5. सिंहः जम्बुकं प्रति किमाह ?

XII. नामनिर्देशपूर्वकं **त्रीणि** सन्धत्त। 6M

1. मनस् + चलति
2. रामस् + षष्ठः
3. अच् + आदिः
4. जगत् + नाथः
5. गुरुः + जयति
6. रामः + करोति

XIII. नामनिर्देशपूर्वकं **त्रीन्** विघटयत। 6M

1. अरीञ्जयति
2. आकृष्टः
3. सुबन्तम्
4. तन्नाम
5. प्रथमोऽध्यायः
6. बालः खादति

XIV. **द्वयोः** शब्दयोः सम्पूर्णतया नामनिर्देशपूर्वकं रूपाणि लिखत। 12M

1. जलमुच्
2. सम्पदा
3. मनस्
4. यद्(नपुं)

XV. **चतुर्णां** समासानां नामनिर्देशपूर्वकं विग्रहवाक्यानि लिखत। 6M

1. यथाशक्ति
2. सप्तरात्रम्
3. विशालाक्षी
4. पितरौ
5. नखभिन्नः
6. पुरुषसिंहः

XVI. **पञ्चानां** वाक्यशुद्धीकरणं कुरुत। 5M

1. ग्रन्थालये पुस्तकं सन्ति।
2. युवकः क्रीडाङ्गने क्रीडन्ति।
3. यूयं जलं पास्यथ।
4. आवां लेखान् अलिखाम।
5. त्वं कार्यालये तिष्ठथः।

**************

www.sakshieducation.com